वाक्यवृत्तिः

वाक्यवृत्तिः

सर्गस्थितिप्रळयहेतुमचिंत्यशक्तिं
विश्वेश्वरं विदितविश्वमनंतमूर्तिं |
निर्मुक्तबंधनमपारसुखांबुराशिं
श्रीवल्लभं विमलबोधघनं नमामि || 1 ||

यस्य प्रसादादहमेव विष्णु-
-र्मय्येव सर्वं परिकल्पितं च |
इत्थं विजानामि सदात्मरूपं
तस्यांघ्रिपद्मं प्रणतोऽस्मि नित्यं || 2 ||

तापत्रयार्कसंतप्तः कश्चिदुद्विग्नमानसः |
शमादिसाधनैर्युक्तः सद्गुरुं परिपृच्छति || 3 ||

अनायासेन येनास्मान्मुच्येयं भवबंधनात् |
तन्मे संक्षिप्य भगवन् केवयं कृपया वद || 4 ||

गुरुरुवाच |
साध्वी ते वचनव्यक्तिः प्रतिभाति वदामि ते |
इदं तदिति विस्पष्टं सावधानमनाः शृणु || 5 ||

तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः |
तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनं || 6 ||

शिष्य उवाच |
को जीवः कः परश्चात्मा तादात्म्यं वा कथं तयोः |
तत्त्वमस्यादिवाक्यं वा कथं तत्प्रतिपादयेत् || 7 ||

गुरुरुवाच |
अत्र ब्रूमः समाधानं कोऽन्यो जीवस्त्वमेव हि |
यस्त्वं पृच्छसि मां कोऽहं ब्रह्मैवासि न संशयः || 8 ||

शिष्य उवाच |
पदार्थमेव जानामि नाद्यापि भगवन् स्फुटं |
अहं ब्रह्मेति वाक्यार्थं प्रतिपद्ये कथं वद || 9 ||

गुरुरुवाच |
सत्यमाह भवानत्र विज्ञानं नैव विद्यते |
हेतुः पदार्थबोधो हि वाक्यार्थावगतेरिह || 10 ||

अंतःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः |
आनंदरूपः सत्यः सन् किं नात्मानं प्रपद्यसे || 11 ||

सत्यानंदस्वरूपं धीसाक्षिणं ज्ञानविग्रहं |
चिंतयात्मतया नित्यं त्यक्त्वा देहादिगां धियं || 12 ||

रूपादिमान्यतः पिंडस्ततो नात्मा घटादिवत् |
वियदादिमहाभूतविकारत्वाच्च कुंभवत् || 13 ||

अनात्मा यदि पिंडोऽयमुक्तहेतुबलान्मतः |
करामलकवत्साक्षादात्मानं प्रतिपादय || 14 ||

घटद्रष्टा घटाद्भिन्नः सर्वथा न घटो यथा |
देहदृष्टा तथा देहो नाहमित्यवधारय || 15 ||

एवमिंद्रियदृङ्नाहमिंद्रियाणीति निश्चिनु |
मनो बुद्धिस्तथा प्राणो नाहमित्यवधारय || 16 ||

संघातोऽपि तथा नाहमिति दृश्यविलक्षणं |
द्रष्टारमनुमानेन निपुणं संप्रधारय || 17 ||

देहेंद्रियादयो भावा हानादिव्यापृतिक्षमाः |
यस्य सन्निधिमात्रेण सोऽहमित्यवधारय || 18 ||

अनापन्नविकारः सन्नयस्कांतवदेव यः |
बुद्ध्यादींश्चालयेत्प्रत्यक्सोऽहमित्यवधारय || 19 ||

अजडात्मवदाभांति यत्सान्निध्याज्जडा अपि |
देहेंद्रियमनःप्राणाः सोऽहमित्यवधारय || 20 ||

आगमन्मे मनोऽन्यत्र सांप्रतं च स्थिरीकृतं |
एवं यो वेद धीवृत्तिं सोऽहमित्यवधारय || 21 ||

स्वप्नजागरिते सुप्तिं भावाभावौ धियां तथा |
यो वेत्त्यविक्रियः साक्षात्सोऽहमित्यवधारय || 22 ||

घटावभासको दीपो घटादन्यो यथेष्यते |
देहावभासको देही तथाहं बोधविग्रहः || 23 ||

पुत्रवित्तादयो भावा यस्य शेषतया प्रियाः |
द्रष्टा सर्वप्रियतमः सोऽहमित्यवधारय || 24 ||

परप्रेमास्पदतया मा न भूवमहं सदा |
भूयासमिति यो द्रष्टा सोऽहमित्यवधारय || 25 ||

यः साक्षिलक्षणो बोधस्त्वंपदार्थः स उच्यते |
साक्षित्वमपि बोद्धृत्वमविकारितयात्मनः || 26 ||

देहेंद्रियमनःप्राणाहंकृतिभ्यो विलक्षणः |
प्रोज्झिताशेषषड्भावविकारस्त्वंपदाभिधः || 27 ||

त्वमर्थमेवं निश्चित्य तदर्थं चिंतयेत्पुनः |
अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च || 28 ||

निरस्ताशेषसंसारदोषोऽस्थूलादिलक्षणः |
अदृश्यत्वादिगुणकः पराकृततमोमलः || 29 ||

निरस्तातिशयानंदः सत्यः प्रज्ञानविग्रहः |
सत्तास्वलक्षणः पूर्णः परमात्मेति गीयते || 30 ||

सर्वज्ञत्वं परेशत्वं तथा संपूर्णशक्तिता |
वेदैः समर्थ्यते यस्य तद्ब्रह्मेत्यवधारय || 31 ||

यज्ज्ञानात्सर्वविज्ञानं श्रुतिषु प्रतिपादितं |
मृदाद्यनेकदृष्टांतैस्तद्ब्रह्मेत्यवधारय || 32 ||

यदानंत्यं प्रतिज्ञाय श्रुतिस्तत्सिद्धये जगौ |
तत्कार्यत्वं प्रपंचस्य तद्ब्रह्मेत्यवधारय || 33 ||

विजिज्ञास्यतया यच्च वेदांतेषु मुमुक्षुभिः |
समर्थ्यतेऽतियत्नेन तद्ब्रह्मेत्यवधारय || 34 ||

जीवात्मना प्रवेशश्च नियंतृत्वं च तान्प्रति |
श्रूयते यस्य वेदेषु तद्ब्रह्मेत्यवधारय || 35 ||

कर्मणां फलदातृत्वं यस्यैव श्रूयते श्रुतौ |
जीवनां हेतुकर्तृत्वं तद्ब्रह्मेत्यवधारय || 36 ||

तत्त्वंपदार्थौ निर्णीतौ वाक्यार्थश्चिंत्यतेऽधुना |
तादात्म्यमत्र वाक्यार्थस्तयोरेव पदार्थयोः || 37 ||

संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः |
अखंडैकरसत्वेन वाक्यार्थो विदुषां मतः || 38 ||

प्रत्यग्बोधो य आभाति सोऽद्वयानंदलक्षणः |
अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः || 39 ||

इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् |
अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि || 40 ||

तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु |
पूर्णानंदैकरूपेण प्रत्यग्बोधोऽवतिष्ठते || 41 ||

तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने |
लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादाय प्रवर्तते || 42 ||

हित्वा द्वौ शबलौ वाच्यौ वाक्यं वाक्यार्थबोधने |
यथा प्रवर्ततेऽस्माभिस्तथा व्याख्यातमादरात् || 43 ||

आलंबनतया भाति योऽस्मत्प्रत्ययशब्दयोः |
अंतःकरणसंभिन्नबोधः स त्वंपदाभिधः || 44 ||

मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः |
पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः || 45 ||

प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता |
विरुध्यते यतस्तस्माल्लक्षणा संप्रवर्तते || 46 ||

मानांतरविरोधे तु मुख्यार्थस्यापरिग्रहे |
मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते || 47 ||

तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा |
सोऽहमित्यादिवाक्यस्थपदयोरिव नापरा || 48 ||

अहं ब्रह्मेतिवाक्यार्थबोधो यावद्दृढी भवेत् |
शमादिसहितस्तावदभ्यसेच्छ्रवणादिकं || 49 ||

श्रुत्याचार्यप्रसादेन दृढो बोधो यदा भवेत् |
निरस्ताशेषसंसारनिदानः पुरुषस्तदा || 50 ||

विशीर्णकार्यकरणो भूतसूक्ष्मैरनावृतः |
विमुक्तकर्मनिगलः सद्य एव विमुच्यते || 51 ||

प्रारब्धकर्मवेगेन जीवन्मुक्तो यदा भवेत् |
किंचित्कालमनारब्धकर्मबंधस्य संक्षये || 52 ||

निरस्तातिशयानंदं वैष्णवं परमं पदं |
पुनरावृत्तिरहितं कैवल्यं प्रतिपद्यते || 53 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ वाक्यवृत्तिः संपूर्णं |